श्रीकमलाकरभट्टविरचितः

# सिद्धान्ततत्त्वविवेकः

विस्तृतभूमिकाटिप्पण्यादिभिर्भूषितः

THE

# SIDDANTATAT·TVAVIVEKA

OF

## PAṆḌIT KAMALĀKARA BHAṬṬA

*Edited with notes by*

**M. M. Pt. Sudhakar Dvivedi**

&

**M. M. Pt. Muralidhar Jha**

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

# अथ सिद्धान्ततत्त्वविवेकस्यानुक्रमणिका ।


| | पृष्ठे |
|---|---|
| मध्यमाधिकारः | १ |
| स्पष्टाधिकारः | ६१ |
| त्रिप्रश्नाधिकारः | २४३ |
| बिम्बाधिकारः | ३१५ |
| छायाधिकारः | ३४४ |
| शृङ्गोन्नत्यधिकारः | ३५७ |
| उदयास्ताधिकारः | ३८६ |
| पर्वसम्भवाधिकारः | ४१४ |
| चन्द्रग्रहणाधिकारः | ४२० |
| सूर्यग्रहणाधिकारः | ४४५ |
| भग्रहयुत्यधिकारः | ५१२ |
| पाताधिकारः | ५३१ |
| महाप्रश्नाधिकारः | ५३६ |

श्रीजानकीवल्लभो विजयते ।

# सिद्धान्ततत्त्वविवेकस्य भूमिका ।

विपिनेऽपि पिनाकिनादिना यो महितो दक्षसुतासमन्वितेन ।
स महीतनयाप्रियोऽर्चनोयो भगवान् मङ्गलमातनोतु रामः ॥ १ ॥

अशीत्यधिकपञ्चदशशततमे शालिवाहनीयशके भास्करीयसिद्धान्तशिरोमणिमरीचिरचयितुर्विश्वरूपोपनामकमुनीश्वरस्य स्पर्धया बाहुल्येन श्रीभास्करप्रकारखण्डनपर एव श्रीकृष्णदैवविदः पौत्रेण वासनावार्त्तिकसौरभाष्यादिबहुनिबन्धनिर्मातुः श्रीनृसिंहदैवज्ञस्य तनूजेन निजज्येष्ठभ्रातृदिवाकराद्धीतविद्येन भास्करविरोधिनापि भास्करभक्तेन श्रीकमलाकराभिधानेनाकारि किलायं सौरतत्त्वविवेकरूपः सिद्धान्ततत्त्वविवेकाभिधो ज्यौतिषसिद्धान्तः । अत्र यद्यपि परदूषणाभिलाषेणोदयान्तरखण्डनं ( २९—३६ पृ० ) व्यासात्परिध्यानयनं ( ५०—५२ पृ० १४३—१५५ श्लो० ) तात्कालिकस्पष्टभोग्यखण्डखण्डनं ( १७१ पृ० १७५—१७७ श्लो० ) लघुज्यासाधने स्पष्टभोग्यखण्डखण्डनं ( १७२—१७५ पृ० १७९—१८३ श्लो० ) वृत्तफलं परिधिघ्नमित्यस्य समाधानं ( ५६२—५६३ पृ० ३०७—३०६ श्लो० ) धनर्णसन्धौ गतिफलाभावखण्डन (५९३ पृ० ३१०—३११ श्लो०) मित्याद्योऽन्यथार्थाः प्रतिपादितास्तथापि ध्रुवभस्याস्थिरत्वप्रतिपादनं ( ४१ पृ० ७५—८० श्लो० ) ग्रहगोलानां भ्रमे परस्पराऽऽघातवर्णनं ( ४२—४३ पृ० ८७—९१ श्लो० ) जलाग्निगोलकल्पनं ( ४३ पृ० ६२—६३ श्लो० ) गुरुत्वकेन्द्रकल्पनं ४६ पृ० १०९—११० श्लो० ) जलार्णवस्य भ्रमणं ( ४६ पृ० ११२ श्लो० ) भूपिण्डस्य वर्त्तुलत्वनिरूपणं ( ४७ पृ० ११९—१२० श्लो० ) भूगोलोऽर्द्धाधिको जलमग्न इति यवनमतनिरूपणं ( ४७—४८ पृ० १२२—१२४ श्लो० ) खालदात्ताभिधान्नगरात्तूलांशप्रतिपादनं ( ५६—५७ पृ० १७२—१७४ श्लो० ) घनकरकाभूकम्पमहामारीत्यादिकारणं ( ६१—६३ पृ० १९६—२०६ श्लो० ) उदये रक्तबिम्बे कारणं ( ६३ पृ० २१०—२११ श्लो० ) लोहगोलखण्डनं ( ७४—८४ पृ० २६१—३०३ श्लो० ) दर्पणादौ प्रतिबिम्बदर्शने विशेषः ( ८८—९० पृ० ३२७—३३३ श्लो० ) अवर्गाङ्कस्य मूलविचारः ( ९२—१०४ पृ० ) रेखादिपरिभाषा ( १०४ पृ० २२—२३ श्लो० ) सजातीयक्षेत्रलक्षणं ( १०५—१०७ पृ० ३४—४८ श्लो० ) भास्करीययोगान्तरज्यासाधनोपपत्तौ मुनीश्वरादिमतखण्डनं ( १११—११६ पृ० ) अपूर्वभावनोपपत्तिकथनं ( ११६—११८ पृ० ) स्वकल्पितयोगान्तरज्यासाधनोपपत्तिवर्णनं ( १२५—१३३ पृ० ) तदन्यलम्बान्न लघुरिति भास्करी-

अथ वा परिधेर्वर्गवर्गात् खाङ्केन्दुभाजितात् ।
पदं क्षेत्रफलं(१) चाऽस्मात् परिधिस्तु विलोमतः ॥ १५७ ॥
पदं(२) रेखात्मकं ग्राह्यं वास्तवं यदि चान्तरात् ।
पदस्यानयनं स्वेष्टं तर्हि तद्गुणितात् कुरु ॥ १५८ ॥
रामा(३)नवाब्ध्यब्ध्ययोऽङ्का दशानां मूलमुच्यते ।
रूपव्यासे तु परिधिर्दशमूलमितः स तु ॥ १५९ ॥
इष्टव्यासेन गुणितः स्वेष्टव्यासे प्रजायते ।

---

विशेषशरणः ।

$= \sqrt{\frac{व्या^{२} \times व्या^{२} \times १०}{१६}} = \sqrt{\frac{व्या^{४} \times ५}{८}}$ अत उपपन्नम् ।

(१) $प = \sqrt{व्या^{२} \times १०} \therefore प^{२} = व्या^{२} \times १०$

$\therefore व्या = \sqrt{\frac{प^{२}}{१०}} \therefore वृ.\ फ. = \frac{प}{४}\sqrt{\frac{प^{२}}{१०}} = \sqrt{\frac{प^{२} \times प^{२}}{१६ \times १०}}$

$= \sqrt{\frac{प^{२} \therefore}{१६०}}$ अत उपपन्नम् ।

(२) वास्तवं पदं मूलं रेखात्मकं ग्राह्यं बुद्ध्या ग्रहणीयं ज्ञेयमित्यर्थः । यदि चान्तरात् यत् किञ्चिदन्तरं स्वीकृत्य पदस्यानयनं स्वेष्टं स्वाभीष्टं तर्हि तद्गुणितात् तस्यासन्नपदस्य यद्गुणितं तस्माद्गुणितात् कुर्वित्यर्थः ।

(३) "षष्टिवर्गगुणादङ्कात्" इत्यादिवक्ष्यमाणविधिना 'रामा नवाब्धय' इत्याद्यङ्का उपपद्यन्ते ।